# Shivakritam Surabhi Stotram

# શિવકૃતં સુરભિસ્તોત્રમ્

## Document Information

Text title : Shivakritam Surabhi Stotram

File name : shivakRRitaMsurabhistotram.itx

Category : devii, devI, skandapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : skandapurANa | nAgarakhaNDa | adhyAya 258/30-44||

Latest update : August 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 24, 2025

*sanskritdocuments.org*

# શિવકૃતં સુરભિસ્તોત્રમ્

સુરભિં ગાં ચ ગોલોકે તાં તુષ્ટાવ સુસંયતઃ ।
સૃષ્ટિસ્થિતિવિનાશાનાં કર્ત્ર્યૈ માત્રે નમો નમઃ ॥ ૩૦॥

યા ત્વં રસમયૈર્ભાવૈરાપ્યાયયસિ ભૂતલમ્ ।
દેવાનાં ચ તથાસઙ્ઘાન્પિતૃણામપિ વૈ ગણાન્ ॥ ૩૧॥

સર્વૈર્જ્ઞાતા રસાભિજ્ઞૈર્મધુરાસ્વાદદાયિની ।
ત્વયા વિશ્વમિદં સર્વં બલસ્નેહસમન્વિતમ્ ॥ ૩૨॥

ત્વં માતા સર્વરુદ્રાણાં વસૂનાં દુહિતા તથા ।
આદિત્યાનાં સ્વસા ચૈવ તુષ્ટા વાઞ્છિતસિદ્ધિદા ॥ ૩૩॥

ત્વં ધૃતિસ્ત્વં તથા પુષ્ટિસ્ત્વં સ્વાહા ત્વં સ્વધા તથા ।
ઋદ્ધિઃ સિદ્ધિસ્તથા લક્ષ્મીર્ધૃતિઃ કીર્તિસ્તથા મતિઃ ॥ ૩૪॥

કાન્તિર્લજ્જા મહામાયા શ્રદ્ધા સર્વાર્થસાધિની ।
ત્વયા વિરહિતં કિઞ્ચિન્નાસ્તિ ત્રિભુવનેષ્વપિ ॥ ૩૫॥

વહ્નેસ્તૃપ્તિપ્રદાત્રી ચ દેવાદીનાં ચ તૃપ્તિદા ।
ત્વયા સર્વમિદં વ્યાપ્તં જગત્સ્થાવરજઙ્ગમમ્ ॥ ૩૬॥

પાદાસ્તે વેદાશ્ચત્વારઃ સમુદ્રાઃ સ્તનતાં યયુઃ ।
ચન્દ્રાર્કૌ લોચને યસ્યા રોમાગ્રેષુ ચ દેવતાઃ ॥ ૩૭॥

શૃઙ્ગયોઃ પર્વતાઃ સર્વે કર્ણયોર્વાયવસ્તથા ।
નાભૌ ચૈવામૃતં દેવિ પાતાલાનિ ખુરાસ્તથા ॥ ૩૮॥

સ્કન્ધે ચ ભગવાન્બ્રહ્મા મસ્તકસ્થઃ સદાશિવઃ ।
હૃદ્દેશે ચ સ્થિતો વિષ્ણુઃ પુચ્છાગ્રે પન્નગાસ્તથા ॥ ૩૯॥

શકૃત્સ્થા વસવઃ સર્વે સાધ્યા મૂત્રસ્થિતાસ્તવ ।
સર્વે યક્ષા હ્યસ્થિદેશે કિન્નરા ગુહ્યસંસ્થિતાઃ ॥ ૪૦॥

પિતૄણાં ચ ગણાઃ સર્વે પુરઃસ્થા ભાન્તિ સર્વદા ।
સર્વે યક્ષા ભાલદેશે કિન્નરાશ્ચ કપોલયોઃ ॥ ૪૧॥

સર્વદેવમયી ત્વં હિ સર્વભૂતવિવૃદ્ધિદા ।
સર્વલોકહિતા નિત્યં મમ દેહહિતા ભવ ॥ ૪૨॥

પ્રણતસ્તવ દેવેશિ પૂજયે ત્વાં સદાઽનઘે ।
સ્તૌમિ વિશ્વાર્તિહન્ત્રીં ત્વાં પ્રસન્ના વરદા ભવ ॥ ૪૩॥

વિપ્રશાપાગ્નિના દગ્ધં શરીરં મમ શોભને ।
સ્વતેજસા પુનઃ કર્ત્તુમર્હસ્યમૃતસમ્ભવે ॥ ૪૪॥

ઇતિ શ્રીસ્કન્દપુરાણે નાગરખણ્ડે અષ્ટપઞ્ચાશત્તમાધિકદ્વિશતતમાધ્યાયાન્તર્ગતં
શિવકૃતં સુરભિસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । નાગરખણ્ડ । અધ્યાય ૨૫૮/૩૦-૪૪॥

skandapurANa . nAgarakhaNDa . adhyAya 258/30-44..

Proofread by PSA Easwaran

*Shivakritam Surabhi Stotram*

pdf was typeset on August 24, 2025

Please send corrections to *sanskrit@cheerful.com*